श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्रामायणे वाल्मीकीये सुन्दरकाण्डे

# ॥ श्री आञ्जनेय नवरत्नमाला स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री आञ्जनेय नवरत्नमाला स्तोत्रम् ॥

## माणिक्यम्

ततो रावणनीतायाः सीतायाः शत्रुकर्शनः।
इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥ 1 ॥

## मुत्यम्

यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव।
स्मृतिर्मतिर्धृतिर्दाक्ष्यं स कर्मसु न सीदति ॥ 2 ॥

## प्रवालम्

अनिर्वेदः श्रियो मूलं अनिर्वेदः परं सुखम्।
अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ॥ 3 ॥

## मरकतम्

नमोऽस्तु रामाय सलक्ष्मणाय
देव्यै च तस्यै जनकात्मजायै।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यः
नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः ॥ 4 ॥

## पुष्परागम्

प्रियान्न सम्भवेद्दुःखं अप्रियादधिकं भयम्।
ताभ्यां हि ये वियुज्यन्ते नमस्तेषां महात्मनाम्॥ 5॥

## हीरकम्

रामः कमलपत्राक्षः सर्वसत्त्वमनोहरः।
रूपदाक्षिण्यसम्पन्नः प्रसूतो जनकात्मजे॥ 6॥

## इन्द्रनीलम्

जयत्यतिबलो रामो लक्ष्मणश्च महाबलः।
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः॥ 7॥

## गोमेदकम्

यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः।
यदि वास्त्येकपत्नीत्वं शीतो भव हनूमतः॥ 8॥

## वैडूर्यम्

निवृत्तवनवासं तं त्वया सार्धमरिन्दमम्।
अभिषिक्तमयोध्यायां क्षिप्रं द्रक्ष्यसि राघवम्॥ 9॥

॥ इति श्री आञ्जनेय नवरत्नमाला स्तोत्रं समाप्तम्॥